# ॥ वाल्मीकि रामायण ॥

## १ बालकाण्ड

### अध्याय १९

तच्छ्रुत्वा राजशार्दूल विश्वामित्रस्य भाषितम् ।
मुहूर्तमिव निःसंज्ञः संज्ञावानिदमब्रवीत् ॥ १ ॥

ऊनषोडशवर्षो मे रामो राजीवलोचनः ।
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥

इयमक्षौहिणी पूर्णा यस्याहं पतिरीश्वरः ।
अनया संवृतो गत्वा योधाहं तैर्निशाचरैः ॥ ३ ॥

इमे शूराश्च विक्रान्ता भृत्या मेऽस्त्रविशारदाः ।
योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥

अहमेव धनुष्पाणिर्गोप्ता समरमूर्धनि ।
यावत्प्राणान्धरिष्यामि तावद्योत्स्ये निशाचरैः ॥ ५ ॥

निर्विघ्ना व्रतवर्या सा भविष्यति सुरक्षिता ।
अहं तत्र गमिष्यामिल्न राम नेतुमर्हसि ॥ ६ ॥

बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् ।
न चास्त्रबलसंयुक्तो न च युद्धविशारदः ।
न चासौ रक्षसां योग्यः कूटयुद्धा हि ते ध्रुवम् ॥ ७ ॥

विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ।
जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि ॥ ८ ॥

यदि वा राघवं ब्रह्मन्नेतुमिच्छसि सुव्रत ।
चतुरङ्गसमायुक्तं मया सह च तं नय ॥ ९ ॥

षष्टिर्वर्षसहस्राणि जातस्य मम कौशिकः ।
दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥ १० ॥

चतुर्णामात्मजानां हि प्रीतिः परमिका मम ।
ज्येष्ठं धर्मप्रधानं च न रामं नेतुमर्हसि ॥ ११ ॥

किं वीर्या राक्षसास्ते च कस्य पुत्राश् च के च ते ।
कथं प्रमाणाः के चैतान्रक्षन्ति मुनिपुङ्गव ॥ १२ ॥

कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ।
मामकैर्वा बलैर्ब्रह्मन्मया वा कूटयोधिनाम् ॥ १३ ॥

सर्वं मे शंस भगवन्कथं तेषां मया रणे ।
स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः ॥ १४ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ।
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः ॥ १५ ॥

स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ।
महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः ॥ १६ ॥

श्रूयते हि महावीर्यो रावणो राक्षसाधिपः ।
साक्षाद्वैश्रवणभ्राता पुत्रो विश्वरसो मुनेः ॥ १७ ॥

यदा स्वयं न यज्ञस्य विघ्नकर्ता महाबलः ।
तेन सञ्चोदितौ तौ तु राक्षसौ सुमहा बलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ १८ ॥

इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ।
न हि शक्तोऽस्मि सङ्ग्रामे स्थातुं तस्य दुरात्मनः ॥ १९ ॥

स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके ।
देवदानवगन्धर्वा यक्षाः पतग पन्नगाः ॥ २० ॥

न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ।
स हि वीर्यवतां वीर्यमादत्ते युधि राक्षसः ॥ २१ ॥

तेन चाहं न शक्तोऽस्मि संयोद्धुं तस्य वा बलैः ।
सबलो वा मुनिश्रेष्ठ सहितो वा ममात्मजैः ॥ २२ ॥

कथमप्यमरप्रख्यं सङ्ग्रामाणाम् अकोविदम् ।
बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् ॥ २३ ॥

अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ।
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् ॥ २४ ॥

मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ।
तयोरन्यतरेणाहं योद्धा स्यां ससुहृद्गणः ॥ २५ ॥

।

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com